CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतवाचनमाला।

(द्विभागात्मिका)

प्रथम - द्वितीय-इयत्ता-कृते संयुक्तपुस्तकम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतवाचनमाला।

(द्विभागात्मिका)

प्रथम -द्वितीय-इयत्ता-कृते संयुक्तपुस्तकम्।

सम्पादकौ

डॉ. श्री. ग. मो. पाटील
एम्.ए., एल्एल्.बी., पीएच्.डी.
संस्कृतकुलगुरुः।

श्री. ग. वा. करंदीकर
एम्.ए.,बी.टी.
अध्यक्षः, संस्कृतभाषासंस्था।

मूल्यम् २५/- रुप्यकाणि।

प्रकाशनम् १९९६ फेब्रुवारी।

संस्कृतभाषासंस्था-प्रकाशनम्।
सङ्केतः- श्री. ग. वा. करंदीकर
एफ् ४८, मयूर सोसायटी,
कीर्ति महाविद्यालय मार्ग,
दादर, मुंबई ४००.०२८
दूरवाणी · ४२२ ९२ १४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रधान-सम्पादकौ।

डॉ. श्री. ग. मो. पाटील
एम्.ए., एल्एल्.बी., पीएच्.डी.
संस्कृतकुलगुरुः।

श्री. ग. वा. करंदीकर
एम्.ए.,बी.टी.
अध्यक्षः, संस्कृतभाषासंस्था।

सम्पादकमण्डलसदस्याः।

सौ. वीणा सुरेश गोडबोले, एम्. ए. बी. एड्.
श्री. अरुण वामन अत्रे, बी.ए., एल्एल्.बी. संस्कृत-विशारदः।
श्री. वसन्त शङ्कर नानिवडेकर, कार्यवाहः, शाहिरी-सङ्गमः।
श्रीमती प्रमिला पारेख, एम्.ए.बी.टी.
पं. गुलाम दस्तगीर बिराजदार, एम्.ए., सम्पादकः, विश्वभाषा।
सौ. पूजा दिलिप साठे , एम्.ए.
सौ. संध्या दत्तात्रय मिरवणकर, एम्. ए.
सौ. शोभना गणेश करंदीकर, एम्. ए. बी. एड्.
श्री. माधव नीलकण्ठ सप्रे. बी. कॉम्.
डॉ. सौ. उज्ज्वला चन्द्रकान्त थत्ते, बी.डी.एस्.,एम्.ए. (संस्कृत)

संस्थार्थं विमर्शदातारः।

श्री. सुरेश प्रभू, बी.कॉम्. (ऑनर्स), एल्एल्.बी., एफ्.सी.ए.
डॉ. शान्तिलाल सोमैया, संस्कृताधारः, उद्योगपतिः।
श्री. श्री. धुं. कवीश्वर, मानसेवी संस्कृत-सङ्घटकः, महाराष्ट्र-शासनम्।
डॉ. श्री. मो. दि. पराडकर, एम्. ए, पीएच्. डी.
डॉ. सौ. कमल अभ्यंकर, एम्. ए. पीएच्. डी.
डॉ. सौ. चन्द्रकला प. पाटील, एम्.डी.

वितरण-व्यवस्था-मण्डल-सदस्याः।

१) श्री. दामोदर विनायक बाळे, बी. एस्सी. (ऑनर्स), एल्.टी.सी.
२) सौ. वीणा सुरेश गोडबोले, एम्. ए.,बी.एड्.

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रस्तावना।

भारतदेशे संस्कृतभाषा अचिरेण सर्वतोमुखी भवतु इति हेतुना संस्कृतभाषासंस्था **"संस्कृतवाचनमाला-रचना-सङ्कल्पं"** कृतवती।

भारतीय-प्रादेशिक-भाषाणां जननी संस्कृतभाषा। प्रादेशिकभाषासु सामान्यतः ८५ प्रतिशतं शब्दाः संस्कृतशब्दाः एव। धर्म-अर्थ-काम-मोक्ष-प्रदं विपुलं विविधं समृध्दं सरसं च साहित्यं संस्कृतभाषायाम् अस्ति। संस्कृतसाहित्यं भारतीयसंस्कृतेः दर्पणः एव। भारतीय-एकात्मता-साधिका, नवीनशब्दनिर्माणक्षमा, प्रादेशिकभाषासमृध्दकरी च संस्कृतभाषा। प्रादेशिकभाषासौष्ठवार्थं संस्कृतभाषा सदैव आधारभूता नैव कदापि भारभूता। संस्कृतसाहित्यवाचनार्थं प्रथमं संस्कृतभाषाभ्यासः आवश्यकः। तदनन्तरं यथेच्छं यथायोग्यं यथामति यथाशक्ति च संस्कृतसाहित्याभ्यासं कृत्वा संस्कृतभाषायां साहित्यनिर्माणम् अपि करिष्यति अभ्यासकः।

अतः पाठशालाध्ययनकाले संस्कृतभाषा शनैः शनैः क्रमशः पठनीया पाठनीया च। प्रथम-इयत्तातः दशम-इयत्तापर्यन्तं दशसु वर्षेषु दशानां पुस्तकांना वाचनेन अभ्यासेन च विद्यार्थी संस्कृतभाषायां स्व-विचार-कल्पना-भावना-अनुभवान् प्रकटीकर्तुं संस्कृतभाषायां सम्भाषण-भाषण-वाचन-लेखनं कर्तुं दैनन्दिनव्यवहारे मातृभाषावत् संस्कृतभाषाम् उपयोक्तुं च समर्थः भविष्यति।

प्रथम-द्वितीय-इयत्ता-कृते सिध्दीकृतमिदं संयुक्तपुस्तकम्। अनेकसंस्कृतज्ञैः बालानां रुचिं ग्रहणशक्तिम् अनुभवविश्वं च विचार्य अनुरूपाः पाठाः रचिताः। तेषामाधारेण प्रयोगार्थं पुस्तकं सिध्दीभूतं गतवर्षे ऑक्टोबरमासे। तत् प्रायोगिकं पुस्तकं पठित्वा आसन्न-चत्वारिंशत्-जनैः अभिप्रायाः प्रेषिताः। तान् समीक्ष्य, इष्टपरिवर्तनं कृत्वा च सिध्दीकृतमिदं पुस्तकम्।

प्रत्येक-इयत्ता-कृते ३० पाठाः। वर्षस्य ३० सप्ताहेषु प्रतिसप्ताहम् एकहोरावधौ (द्वौ कालखण्डौ) एकैकः पाठ : वाचनीयः पाठितव्यः च । व्याकरणचर्चा सर्वथा वर्जनीया। भाषान्तरमपि न करणीयम्। चित्राधारेण वारं वारं पाठवाचनेन यावती भाषा आत्मसात् भवेत् तावती पर्याप्ता भवेत् तस्याम् इयत्तायाम् । दशवर्षान्ते दशपुस्तकांना वाचनेन संस्कृतभाषाप्रावीण्यं भवेत् एव। गृहे गृहे अपि वाचनं लाभप्रदम्। बालाः चित्रप्रियाः। सम्पूर्णपुस्तके चित्र-आलेखनं महता कौशल्येन श्रीमत्या ऋजुता घाटे-(बी.एफ्.ए.) -महोदयया कृतम्। तदर्थं तस्यै धन्यवादाः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दीयन्ते। परिशिष्टे पदार्थाः प्रश्नाः च समाविष्टाः। तेषाम् उपयोगः पाठकैः करणीयः। इति अलम्। धन्यवादाः।

सम्पादकौ।

* * *

भारत में सर्व प्राथमिक पाठशालाओं में. पहली इयत्ता से ही, संस्कृतभाषा का वाचन, मातृभाषाके साथ साथ, विनायास हो जाय इस दृष्टिसे संस्कृतवाचनमाला की योजना है। पहली और दूसरी इयत्ताओं के लिये यह संयुक्त पुस्तक है। एक एक इयत्ता में ३० पाठों का वाचन, ३० सप्ताहों में (तीस घण्टों में, ६० कालखण्डों में) पर्याप्त होगा। घर घर में भी इस पुस्तक का वाचन लाभप्रद होगा। हिन्दी में उपयोग किये जानेवाले लगभग ८५ प्रतिशत शब्द मूलतः संस्कृत शब्द ही है. इसका बोध वाचकों को होगा। संस्कृत ग्रन्थोंका वाचन, अध्ययन, संशोधन करने के लिये प्रथमतः संस्कृत भाषापर प्रभुत्व अनिवार्य है। **संस्कृतवाचनमाला की दस पुस्तकें** पढने से संस्कृत भाषापर प्रभुत्व जरुर होगा। विश्वास है कि सारी भारतीय जनता संस्कृतवाचनमाला को समुचित आदर करेगी।

* * *

Learning a language is acquiring the four basic skills in it viz. listening, speaking, reading and writing and also using the language in everyday situations. Sanskrit language is the mother of all the state languages. About 85% words in state languages are Sanskrit words or have their origin in Sanskrit.

To study Sanskrit literature, good study of Sanskrit language has to be done in school-age, along with the mother -tongue, starting from Std I.

This combined book is prepared for being read in stds. I & II (30 lessons in each standard, in 30 weeks, in 30 hours i. e. in 60 periods) in all primary schools and in all homes in this country.

We are grateful to the proprietor of Ganesh Printers Shri. Shreekant Shastri and his staff, as well as to the Proprietors of Sudarshan Art Printing Press, for bringing out the book in this nice from within the shortest possible time.

Editors

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनुक्रमणिका।

प्रथमो भागः।

पाठ-क्र.	पाठ -नाम	पृष्ठ-क्र.
	प्रार्थना ॥१॥	
	वर्णमाला (स्वराः।)	१
	वर्णमाला (व्यञ्जनानि)	३
१	पक्षि-वर्गः।	१०
२	पालित-पशु-वर्गः।	१२
३	वन्य-पशु-वर्गः।	१४
४	रङ्गबोधः।	१६
५	कीटाः।	१७
६	बाला यान्ति शिशु-शालाम्।	१८
७	कः किं खादति?	१९
८	कः कुत्र वसति?	२०
९	कः कथम् आरौति?	२१
१०	अहं मनुष्यः।	२२
११	वार-नामानि।	२३
१२	शिशु-बोधः।	२४
१३	सीमा गोपालं मिलति।	२५
१४	पुत्तलिका।	२६
१५	चित्रवर्णनम्।	२७
१६	वनम्।	२८
१७	बालाः किं कुर्वन्ति।	२९
१८	जन्मदिनम्।	३०
१९	एक-द्वि-त्रि-चतुर्।	३१
२०	सञ्चलनगीतम्।	३२
२१	अम्लाः द्राक्षाः।	३३
२२	यानगीतम्।	३४
२३	बालः किं करोति?	३५
२४	अहं रमेशः। अहं रेखा।	३६
२५	रमेशः चलति।	३७
२६	अश्वः।	३८
२७	मम दिनचर्या।	३९
२८	मम पाठशाला।	४०
२९	कोऽहम्?	४१
३०	चतुरः काकः।	४२
	संस्कृत सुभाषितमाला ॥१॥	४३
	संस्कृतप्रश्नाः।	४४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अनुक्रमणिका।

द्वितीयो भागः।

पाठ-क्र.	पाठ-नाम	पृष्ठ-क्र.
	प्रार्थना ॥२॥	
१	श्रीगणेशाय नमः।	४५
२	मम माता मम देवता।	४६
३	गौः।	४७
४	ईशा शुभां मिलति।	४८
५	पक्षि-गीतम्।	४९
६	चन्द्र-गीतम्।	५०
७	कूर्म-शशकयोःकथा।	५१
८	मयूरः।	५३
९	मम हस्तद्वयम्।	५४
१०	पत्रवितरकः।	५५
११	गर्दभ-विडम्बना।	५६
१२	गृहिणी-कार्याणि।	५७
१३	स्त्री-व्यवसायाः।	६०
१४	पठत।	६२
१५	कुत्र किम् अस्ति?	६३
१६	रिक्त-स्थल-पूरणम्।	६४
१७	नदीतट-विहारः।	६५
१८	सूर्यः।	६६
१९	मम शरीरम्।	६७
२०	कः केन किं करोति?	६८
२१	कुत्र अस्ति?	७०
२२	विद्यालये वर्गः।	७१
२३	अस्तित्व-दर्शनम्।	७२
२४	मासाः।	७३
२५	बालाः स्वप्रमादं जानन्ति।	७४
२६	आरोहति-अवतरति।	७५
२७	पश्यामि-पश्यसि-पश्यति।	७६
२८	आम्रफलं कुत्र अस्ति?	७७
२९	धूर्तः शृगालः।	७८
३०	सिंह-मूषकयोः कथा।	७९
३१	घटिका।	८०
	संस्कृत सुभाषितमाला ॥२॥	८१
	संस्कृतप्रश्नाः।	८२
	परिशिष्टानि।	८३

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतवाचनमाला।

प्रथमो भागः।

प्रथम-इयत्ता-कृते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रार्थना ॥१॥

वक्रतुण्ड महाकाय सूर्यकोटीसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥१॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥२॥

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले तु गोविन्दः प्रभाते करदर्शनम् ॥३॥

समुद्रवसने देवि पर्वतावलिभूषिते ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥४॥

असतो मा सद् गमय ।
तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतं गमय ॥५॥
ॐ शान्तिः। ॐ शान्तिः। ॐ शान्तिः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

स्वराः।

वर्णः	शब्द-पदम्	चित्रम्
अ	अश्वः	
आ	आम्रम्	
इ	इक्षुः	
ई	ईक्षणम्	
उ	उन्दरुः	
ऊ	ऊहनी	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

स्वराः।

वर्णः	शब्द-पदम्	चित्रम्
ऋ	ऋषिः	
ॠ	–	
लृ	–	
ए	एडकः	
ऐ	ऐरावतः	
ओ	ओष्ठौ	
औ	औषधम्	

स्वराः १३

अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, ए, ऐ, ओ, औ,

अनुस्वारः।- ं विसर्गः। -ः

यथा-राम - रामं यथा-राम - रामः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि ('क्'-वर्गः।)

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
क्	क (क् + अ)	कमलम्	
ख्	ख (ख् + अ)	खड्गः	
ग्	ग (ग् + अ)	गरुडः	
घ्	घ (घ् + अ)	घटः	
ङ्	-	कङ्कणम्	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि ('च्'-वर्गः।)

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
च्	च (च् + अ)	**च**क्रम्	
छ्	छ (छ् + अ)	**छ**त्रम्	
ज्	ज (ज् + अ)	**ज**म्बूकः	
झ्	झ (झ् + अ)	**झ**षः	
ञ्	-	चञ्चुः	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि ('ट्'-वर्गः।)

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
ट्	ट (ट् + अ)	टङ्कः	
ठ्	ठ (ठ् + अ)	ठक्कुरः	
ड्	ड (ड् + अ)	डमरुः	
ढ्	ढ (ढ् + अ)	ढक्का	
ण्	ण (ण् + अ)	बाणः	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि ('त्'-वर्गः।)

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
त्	त (त् + अ)	तलहस्तः	
थ्	थ (थ् + अ)	रथः	
द्	द (द् + अ)	दर्पणः	
ध्	ध (ध् + अ)	धनुः	
न्	न (न् + अ)	नकुटम्	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि ('प्'-वर्गः।)

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
प्	प (प् + अ)	पञ्जरः	
फ्	फ (फ् + अ)	फलकः	
ब्	ब (ब् + अ)	बटुः	
भ्	भ (भ् + अ)	भल्लूकः	
म्	म (म् + अ)	मण्डूकः	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि ।

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
य्	य (य् + अ)	यष्टिः	
र्	र (र् + अ)	रज्जुः	
ल्	ल (ल् + अ)	लता	
व्	व (व् + अ)	वटः	

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-वर्णमाला

व्यञ्जनानि

वर्णः	अक्षरम्	शब्द-पदम्	चित्रम्
श्	श (श् + अ)	शशः	
ष्	ष (ष् + अ)	षट्कोणम्	
स्	स (स् + अ)	सर्पः	
ह्	ह (ह् + अ)	हरिणः	

संयुक्त-अक्षर-द्वयम् उच्चार-द्वयम्

क् + ष् + अ = क्ष श्रीः, ॐ

ज् + ञ् + अ = ज्ञ

'ळ' अक्षरं संस्कृतवर्णमालामध्ये नास्ति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१ - पक्षि-वर्गः।

(का इयं पक्षिणी?)
केयं पक्षिणी?
इयं चटका।
(इयं चटका अस्ति।)



(कः अयं पक्षी?)
कोऽयं पक्षी?
अयं काकः।
(अयं काकः अस्ति)



(कः अयं पक्षी?)
कोऽयं पक्षी?
अयं शुकः।
(अयं शुकः अस्ति।)



(कः अयं पक्षी?)
कोऽयं पक्षी?
अयं कुक्कुटः।
(अयं कुक्कुटः अस्ति।)



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(कः अयं पक्षी?)
कोऽयं पक्षी ?
अयं कपोतः।
(अयं कपोतः अस्ति।)



(कः अयं पक्षी?)
कोऽयं पक्षी?
अयं बकः।
(अयं बकः अस्ति)



(कः अयं पक्षी?)
कोऽयं पक्षी?
अयं मयूरः।
(अयं मयूर : अस्ति।)



(कः अयं पक्षी?)
कोऽयं पक्षी?
अयं हंस :।
(अयं हंसः अस्ति।)



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२ - पालित-पशु-वर्गः।

(कः अयं पशुः?)
कोऽयं पशुः?
अयं कुक्कुरः
(अयं कुक्कुरः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयं मार्जारः।
(अयं मार्जारः अस्ति)



(कः अयं पशुः?)
कोऽयं पशुः?
इयं गौः।
(इयं गौः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयं वृषभः।
(अयं वृषभः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
इयं महिषी।
(इयं महिषी अस्ति।)



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(कः अयं पशुः?)
कोऽयं पशुः?
अयं गर्दभः।
(अयं गर्दभः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयम् उष्ट्रः।
(अयम् उष्ट्रः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयम् अजः।
(अयम् अजः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
इयम् अजा।
(इयम् अजा अस्ति।)



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३ - वन्य-पशु-वर्गः।

(कः अयं पशुः?)
कोऽयं पशुः?
अयं व्याघ्रः।
(अयं व्याघ्रः अस्ति।)

(कः अयं पशुः?)
कोऽयं पशुः?
अयं सिंह :।
(अयं सिंह : अस्ति।)

(कः अयं पशुः?)
कोऽयं पशुः?
अयं हस्ती।
(अयं हस्ती अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयं भल्लूकः।
(अयं भल्लूकः अस्ति।)

(कः अयं पशुः?)
कोऽयं पशुः?
अयं वृकः।
(अयं वृकः अस्ति।)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(कः अयं पशुः?)
कोऽयं पशुः?
अयं जम्बूकः।
(अयं जम्बूकः अस्ति।)

(कः अयं पशुः?)
कोऽयं पशुः?
अयं वराहः।
(अयं वराहः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयं हरिणः।
(अयं हरिणः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयं वानरः।
(अयं वानरः अस्ति।)



(कः अयं पशुः?)
कोऽयं पशुः?
अयं शशः।
(अयं शशः अस्ति।)



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

४ - रङ्गबोधः

(वर्णबोधः)



विदूषकः

काकस्य रङ्गः कृष्णः। रुधिरस्य रङ्गः रक्तः।
बकस्य रङ्गः धवलः। आकाशस्य रङ्गः नीलः।
शुकस्य रङ्गः हरितः। हरिद्रायाः रङ्गः पीतः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५ - कीटाः।

(कः अयं कीटः?)
कोऽयं कीटः?
इयं मक्षिका।
(इयं मक्षिका अस्ति।)



(कः अयं कीटः?)
कोऽयं कीटः?
अयं तैलपः।
(अयं तैलपः अस्ति।)



(कः अयं कीटः?)
कोऽयं कीटः?
अयं मत्कुणः।
(अयं मत्कुणः अस्ति।)



(कः अयं कीटः?)
कोऽयं कीटः?
अयं चित्रपतङ्गः।
(अयं चित्रपतङ्गः अस्ति।)



(कः अयं कीटः?)
कोऽयं कीटः?
अयं मशकः।
(अयं मशकः अस्ति।)



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६ - बाला यान्ति शिशुशालाम्।

रविः गच्छति शिशुशालां रविः गच्छति शिशुशालाम्।
प्रातःकाले स्नानं कृत्वा रविः गच्छति शिशुशालाम्।।१।।

उमा गच्छति शिशुशालाम् उमा गच्छति शिशुशालाम्।
दुग्धं पीत्वा अशनं कृत्वा उमा गच्छति शिशुशालाम् ।।२।।

प्राची गच्छति शिशुशालां प्राची गच्छति शिशुशालाम्।
पुस्तक-लेखनी-जलं गृहीत्वा प्राची गच्छति शिशुशालाम्।।३।।

उमा प्राची शिशुशालां रविः शशी शिशुशालाम्।
गणवेशं परिधाय नवीनं बाला यान्ति शिशुशालाम् ।।४।।

भवति खेलनं शालायाम् अ-आ-इ-ई शालायाम्।
वाचन-लेखनं शालायाम् अङ्कमालिका शालायाम् ।।५।।

उमा-प्राची शिशुशालां रविः शशी शिशुशालाम्।
बाला यान्ति शिशुशालां बाला यान्ति शिशुशालाम्।।६।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

७ - कः किं खादति।

गौः किं खादति?
गौः घासं खादति।



अश्वः किं खादति?
अश्वः चणकान् खादति।



मार्जारः किं खादति?
मार्जारः मूषकं खादति।

वानरः किं खादति?
वानरः फलं खादति।

कुक्कुटः किं खादति?
कुक्कुटः धान्यकणान् खादति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८ - कः कुत्र वसति?

हस्ती कुत्र वसति?
हस्ती वने वसति।



गौः कुत्र वसति?
गौः गोष्ठे वसति।



सिंहः कुत्र वसति ?
सिंहः गुहायां वसति।



मत्स्यः कुत्र वसति?
मत्स्यः जले वसति।



उन्दरुः कुत्र वसति?
उन्दरुः बिले वसति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

९ - कः कथम् आरौति।

भेकः करोति डराँव् डराँव् ।





वदति बिडाली म्याव् म्याव्।

काकः क्रोशति काव् काव्।





चटका कूजति चिव् चिव्।

कुक्कुटः आरौति कु-कूऽ - कूऽऽ ।

पिकः कूजति कुहू-कुहू।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१० - अहं मनुष्यः।



अहं मनुष्यः अस्मि।
इदं मम मस्तकम्।
इमौ मम द्वौ हस्तौ।
अहं मस्तकेन हस्ताभ्यां च
देवं प्रणमामि।
इमे मम द्वे नेत्रे।
अहं नेत्राभ्यां पश्यामि।
इयं मम नासिका।
अहं नासिकया गन्धं जिघ्रामि।
इमौ मम द्वौ कर्णौ।
अहं कर्णाभ्याम् आकर्णयामि।
इदं मम मुखम्।
अहं मुखेन वदामि।
अहं मुखेन अन्नं भक्षयामि।
इमौ मम द्वौ चरणौ।
अहं चरणाभ्यां चलामि।

एकः हस्तः द्वौ हस्तौ।
एकः कर्णः द्वौ कर्णौ।
एकः चरणः द्वौ चरणौ।
एकं नेत्रं द्वे नेत्रे।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

११ - वार-नामानि।



प्रथमः वारः रविवारः।

द्वितीयः वारः सोमवारः।

तृतीयः वारः मङ्गलवारः।

चतुर्थः वारः बुधवारः।

पञ्चमः वारः गुरुवारः।

षष्ठः वारः शुक्रवारः।

सप्तमः वारः शनिवारः।

सप्ताहस्य सप्त वाराः।

क्रमशः वारनामानि-

रविवारः, सोमवारः, मङ्गलवारः, बुधवारः,
गुरुवारः, शुक्रवारः, शनिवारः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१२ - शिशुबोधः।



शिशवः शिशवः आयात, आयात ॥धृ॥
हस्तं धरत, हस्तं धरत।
पादं धरत, पादं धरत।
शिशवः शिशवः आयात आयात ॥१॥
शिरः स्पृशत शिरः स्पृशत।
गल्लं स्पृशत गल्लं स्पृशत।
शिशवः शिशवः आयात आयात ॥२॥
बालाः, यूयं हसत हसत।
करतालं रे कुरूत कुरूत।
करतालं कृत्वा कृत्वा गृहं यात ॥३॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१३ - सीमा गोपालं मिलति।

बालिका :- किं तव नाम?

बालः :- मम नाम गोपालः। किं तव नाम?

बालिका :- मम नाम सीमा।

अरे गोपाल, त्वं कुत्र वससि?

गोपालः :- अहं देवालयस्य समीपे केशवकुटीरे वसामि।

अयि, त्वं कुत्र वससि?

सीमा :- अहं देवालयस्य पृष्ठतः वसामि।

अरे गोपाल, अद्य सायं त्वं मम गृहं खेलितुम्

आयासि किम्?

गोपालः :- सीमे, आयामि सायं पञ्चवादने।

सीमा : गोपाल, अवश्यम् आयाहि। अहं प्रतीक्षां करोमि।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१४- पुत्तलिका।

पुत्तलिका रे पुत्तलिका।
सर्वान् रञ्जयति एषा ॥१॥

लुक् लुक् लुक् लुक् नयने।
छुम् छुम् छुम् छुम् चरणे ॥२॥

तुर् तुर् तुर् चलत्येषा।
पीं पीं पीं वदत्येषा ॥३॥

हस्तौ प्रसारयत्येषा।
अभिवादनं करोत्येषा ॥४॥

सुवर्णकेशा एषा।
नीललोचना एषा ॥४॥
कोमलकान्तिः, चारुभाषिणी,
मोहकवदना, मधुरं हसति
बालान् मोहयति एषा ॥५॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१५ - चित्रवर्णनम्।



अस्मिन् चित्रे एका नदी अस्ति।

नदीजले एका नौका अस्ति।

नदीजले मत्स्याः सन्ति।

नदीतीरे द्वौ बालकौ स्तः।

तत्र एकः सेतुः अस्ति।

सेतौ एकं लोकयानम् अस्ति।

सेतौ एकः वृषभशकटः अपि अस्ति।

आकाशे एकं विमानं डयते।

चित्रं मह्यम् अतीव रोचते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१६ - वनम्।

राजन् राजन् कथं वनम्?
रम्यं रम्यं रमणीयम्।।
तत्र वने तरवः सन्ति
कुसुमकोमलाः लताः भवन्ति ।।१।।
चटकापिककाकाः सन्ति
बालबालिकाः विहरन्ति ।।२।।
तडागमस्ति मनोहरम्
रम्यं रम्यं रमणीयम् ।।३।।
राजन् राजन् कथं वनम्?
रम्यं रम्यं रमणीयम् ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१७ - बालाः किं कुर्वन्ति।



राजीवः रिङ्गति।

प्रमोदः उत्पीठे उपविशति।

अशोकः दुग्धं पिबति।

नरेन्द्रः जृम्भते।

मेधा दर्पणे पश्यति।



प्रकाशः स्तम्भम् आलम्बते।



वानरः शाखातः आलम्बते।



गिरीशः निद्राति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१८ - जन्मदिनम् ।

शुभचिन्तनमस्तु अद्य जन्मदिने ते।
नृत्यामः गायामः जन्मदिने ते ॥ध्रु॥

दिने दिने वर्धस्व प्राप्नुहि यशः।
तव मार्गे अस्तु सदा धवलप्रकाशः।
आशीर्युतहस्तो मे अस्तु मस्तके ॥१॥

सर्वेषाम् अद्याशीः सुखं प्राप्नुहि।
सद्गुणसम्पत् लसतु सर्वदा त्वयि।
अभिनन्दनमस्तु अद्य जन्मदिने ते ॥२॥

आयुष्मन् शतं जीव चिरं जीव रे।
लोकमित्रमिति कीर्तिः तव सदास्तु रे।
निरामयं निर्व्याजं हसितमस्तु ते ॥३॥



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१९ - एक-द्वि-त्रि-चतुर्।

एकः	कन्दुकः।
द्वौ	कन्दुकौ।
त्रयः	कन्दुकाः।
चत्वारः	कन्दुकाः।



एका	माला।
द्वे	माले।
तिस्रः	मालाः।
चतस्रः	मालाः।



एकं	कमलम्।
द्वे	कमले।
त्रीणि	कमलानि।
चत्वारि	कमलानि।



पञ्च पुरुषाः।	पञ्च ललनाः।	पञ्च मित्राणि।
षट् बालकाः।	षट् बालिकाः।	षट् फलानि।
सप्त वृक्षाः।	सप्त लताः।	सप्त पर्णानि।
अष्ट नायकाः।	अष्ट नायिकाः।	अष्ट पुष्पाणि।
नव ग्रहाः।	नव तारकाः।	नव नक्षत्रणि।
दश खगाः।	दश कलिकाः।	दश पुस्तकानि।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२० - सञ्चलनगीतम्।

एहि एहि वीर रे
वीरतां विधेहि रे।
भारतस्य रक्षणाय
जीवनं प्रदेहि रे ॥१॥
त्वं हि मार्गदर्शकः
त्वं हि देशरक्षकः।
त्वं हि शत्रुनाशकः
कालनागतक्षकः॥२॥
साहसी सदा भव
वीरतां सदा भज।
भारतीयसंस्कृतिं
मानसे सदा धर ॥३॥
पदं पदं पुरश्चलेत्
सोत्साहं मनो भवेत् ।
भारतस्य गौरवाय
सर्वदा जयो भवेत् ॥४॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२१ - अम्लाः द्राक्षाः।



अस्ति एकः जम्बूकः।

स द्राक्षावल्लीं पश्यति।

तत्र पुष्कलाः द्राक्षाः सन्ति।

द्राक्षाः पक्वाः सन्ति।

जम्बूकः प्रसन्नः भवति।

स चिन्तयति - अद्य द्राक्षाणां मधुरं भोजनं करोमि।

स उत्पतति।

स द्राक्षाः न लभते।

स पुनः उत्पतति।

स द्राक्षाः न लभते।

स वञ्चकः वदति-द्राक्षाः अम्लाः सन्ति।

स दूरं पलायते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२२ - यान-गीतम्।



नौका प्लवते नदीजले
बाष्पनौका चलति सागरे।
विद्युद्यानं धावति लोहमार्गे
विमानं डयते आकाशे।।

यन्त्रयानं धावति मार्गे
वृषभशकट: चलति मार्गे।
अतीव सुखदः यानप्रवासः
सततं हृदये प्रवास-इच्छा ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२३ - बालः किं करोति?

रमेशः कुत्र तिष्ठति?
रमेशः उत्पीठे तिष्ठति।

आनन्दः कुत्र उपविशति?
आनन्दः आसन्द्याम् उपविशति।

सन्तोषः किं करोति?
सन्तोषः वस्त्रम् अपाकरोति।

परागः किं करोति?
परागः वस्त्रम् धारयति।

आदेशः किं करोति?
आदेशः द्वारम् आवृणोति।



समीरः किं करोति?
समीरः द्वारम् अपावृणोति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२४ - अहं रमेशः। अहं रेखा।

अहं रमेशः अस्मि।
अहं बालः।
अहं पाठशालां यामि।
रेखा मम वर्गसखी।
मम गृहे वयं पञ्च जनाः।
प्रथमः तातः सुरेशः।
द्वितीया माता सावित्री।
तृतीया अग्रजा भगिनी सुधा।
चतुर्थः अनुजः भ्राता राजीवः।
पञ्चमः अहं रमेशः।

अहं रेखा अस्मि।
अहं बाला।
अहं पाठशालां यामि।
रमेशः मम वर्गसखा।
मम गृहे वयं पञ्च जनाः।
प्रथमा माता माया।
द्वितीयः तातः आनन्दः।
तृतीयः अग्रजः भ्राता नरेन्द्रः।
चतुर्थी अनुजा भगिनी प्राची।
पञ्चमी अहं रेखा।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२५ - रमेशः चलति।



रमेशः स्वगृहतः देवालयं याति।

तत्र रमेशः देवं नमति।

रमेशः देवालयतः गोपालस्य गृहं याति।

तत्र रमेशः गोपालं मिलति।

गोपालगृहतः रमेशः विपणिं याति।

तत्र स आम्रफलानि क्रीणाति।

विपणितः स पत्रालयं याति।

तत्र पत्रपेटीमध्ये पत्रं क्षिपति।

पत्रालयतः रमेशः स्वगृहम् आयाति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२६ - अश्वः।



अश्वः पालितः पशुः अस्ति।

अश्वस्य चत्वारः पादाः सन्ति।

अश्वस्य द्वे नेत्रे।

अश्वस्य द्वौ कर्णौ।

अश्वस्य ग्रीवा दीर्घा। ग्रीवा केशमयी अस्ति।

अश्वस्य पुच्छं दीर्घम्। पुच्छं केशमयम् अस्ति।

अश्वः पादैः चलति धावति च ।

अश्वः मनुष्यं पृष्ठेन वहति।

अश्वः शकटं कर्षति।

अश्वः उपयोगी पशुः अस्ति।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२७ - मम दिनचर्या।

अहम् उदयः।
अहं प्रभाते षड्वादने प्रबोधामि।
अहं शय्यां त्यजामि।

अहं दन्तधावनं करोमि।

अनन्तरम् अहम् अम्बां नमामि।
अहं तातं देवं च अपि नमामि।

अहं दुग्धं पिबामि।

अहं स्नानं करोमि।

अहं गृहपाठं करोमि।

अहं भोजनं करोमि।

अहं पाठशालां यामि।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२८ - मम पाठशाला।

अहं पाठशालां यामि।
मम अम्बा मां पाठशालां नयति।
मम मित्राणि अपि तत्र आयान्ति।
अहं वर्गं प्रविशामि।

अहम् आसने उपविशामि।
घण्टानादः भवति।
शिक्षिका वर्गं प्रविशति।



वयं सर्वे उत्तिष्ठामः।
शिक्षिका वदति-सुप्रभातं, बालाः।
वयं सर्वे वदामः- सुप्रभातम्, आचार्ये।

वयं सर्वे प्रार्थनां गायामः।
शिक्षिका वदति-उपविशत।
वयम् उपविशामः।
तदनन्तरम् आचार्या अस्मान् पाठयति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२९ - कोऽहम् ?

मम शरीरं विशालम् अस्ति
मम वर्णः श्यामः अस्ति।
मम चत्वारः पादाः स्तम्भवत् पीवराः सन्ति।
मम द्वौ कर्णौ शूर्पवत् विशालौ स्तः।
मम शुण्डा दीर्घा स्थूला च अस्ति।
अहं शुण्डया जलं धरामि मुखे च क्षिपामि।
अहं शुण्डया घासं धरामि मुखे च क्षिपामि।
मम द्वे नेत्रे अतीव लघुनी स्तः।
अहं वने वसामि।
अहं घासं पर्णानि फलानि च खादामि।
अहं वने एकलः न वसामि।
अन्ये पुष्कलाः हस्तिनः मया सह निवसन्ति।
अस्माकं यूथः अस्ति ।
अहं गजः अस्मि।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३० - चतुरः काकः।

अस्ति एकः काकः।
स काकः तृषितः भवति।
स काकः अत्र पश्यति।
अत्र जलं नास्ति।



स काकः तत्र पश्यति।
तत्र जलं नास्ति।
स इतस्ततः भ्रमति।
स एकं घटं पश्यति।
घटे जलम् अस्ति।

परन्तु ज़लं स्तोकम् अस्ति।
स काकः चिन्तयति।
"किं करोमि? भवतु। एवं करोमि।"
स चञ्च्वा पाषाणखण्डं धरति।



उड्डयमानः पाषाँणखण्डम्
आनीय घटे क्षिपति।
एवं स वारंवारं करोति।
घटे जलम् उद्गच्छति।



काकः जलं पिबति।
काकः सन्तुष्टः भवति।
काकः उड्डीय दूरं याति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-सुभाषित-माला ॥१॥

(केवलं कण्ठस्थीकरणार्थम्।)

आकाशात् पतितं तोयं यथा गच्छति सागरम्।
सर्वदेवनमस्कारः केशवं प्रति गच्छति॥१॥
काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥२॥
उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ॥३॥
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥४॥
क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ॥५॥

परोपकराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम् ॥६॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पाठाधारेण केचित् संस्कृतप्रश्नाः।

प्रथमो भागः।

पाठः ७

१) गौः किं खादति? (घासं)
२) का घासं खादति? (गौः)
३) अश्वः किं खादति? (चणकान्)
४) कः चणकान् खादति? (अश्वः)

पाठ : ८

१) वने कः वसति? (हस्ती)
२) गोष्ठे का वसति? (गौः)
३) गुहायां कः वसति? (सिंहः)
४) जले कः वसति? (मत्स्यः)
५) बिले कः वसति? (मूषकः)

पाठ : ९

१) कः डराँव डराँव करोति? (भेकः)
२) का वदति म्याँव म्याँव? (बिडाली)
३) कः क्रोशति काव् काव् ? (काकः)
४) कः कूजति चिव् चिव्? (चटका)
५) कः आरौति कु-कुऽ-कूऽऽ? (कुक्कुटः)

पाठः ११

१) सोमवारानन्तरं कः वारः भवति?
२) मङ्गलवारानन्तरं कः वारः भवति?
(एवं प्रतिवारं प्रश्नाः संभवन्ति।)
३) सोमवारात् प्राक् कः वारः अस्ति?
४) मङ्गलवारात् प्राक् कः वारः अस्ति?
(एवं प्रतिवारं प्रश्नाः सम्भवन्ति।)

पाठ : १३

१) गोपालः कुत्र वसति?(देवालयसमीपे)
२) सीमा कुत्र वसति? (देवालयस्य पृष्ठतः)

पाठः १५

१) नौका कुत्र अस्ति? (नदीजले)
२) लोकयानं कुत्र अस्ति? (सेतौ)
३) विमानं कुत्र अस्ति? (आकाशे)

पाठ : २६

१) अश्वस्य कति पादाः सन्ति? (चत्वारः)
२) अश्वस्य कति नेत्रे स्तः? (द्वे)
३) अश्वस्य कति कर्णौ स्तः? (द्वौ)
४) अश्वस्य ग्रीवा कीदृशी अस्ति? (दीर्घा)
५) अश्वस्य पुच्छं कथम् अस्ति? (दीर्घं)
६) अश्वः किं कर्षति? (शकटं)
७) अश्वः कं पृष्ठेन वहति? (मनुष्यं)
८) कः शकटं कर्षति? (अश्वः)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृतवाचनमाला।

द्वितीयो भागः।

द्वितीय-इयत्ता-कृते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रार्थना।।२।।

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्।।१।।
वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्।।२।।
काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
लोकोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ।।३।।
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु न कश्चित् दुःखभाग् भवेत् ।।४।।

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ।।५।।

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।६।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१ - श्रीगणेशाय नमः।



अयं गणपतिः।
गणपतिः देवः अस्ति।
गणपतिः विद्यायाः देवः।
गणपतिः सुखकर्ता अस्ति।
गणपतिः दुःखहर्ता अस्ति।
गणपतिः विघ्नहर्ता अस्ति।
गणेशस्य चत्वारः हस्ताः।
गणेशस्य एकः एव दन्तः।
गणेशस्य शुण्डा अस्ति।

गणेशाय रक्तपुष्पाणि रोचन्ते।
गणेशाय दूर्वाङ्कुराः रोचन्ते।
गणेशाय मोदकाः रोचन्ते।
पार्वती गणेशस्य जननी।
गणेशः पार्वत्याः पुत्रः।
अहं गणेशं स्मरामि।
अहं गणेशं ध्यायामि।
अहं गणेशं पूजयामि।
अहं गणेशं नमामि।

अभ्यासस्य आरम्भे गणेशस्य स्मरणं करणीयम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२ - मम माता मम देवता।

मम माता मम देवता।
अतिसरला । मयि मृदुला।
गृहकुशला । सा अतुला ।।मम।।

मां दुग्धं पाययति
मां भक्तं भोजयति।
मां नित्यं लालयति
मम चित्तं तोषयति ।। मम ।। १ ।।

सायङ्काले नीराजयति
पाठयति च मां शुभं करोति।
धनसम्पत्कल्याणार्थं तु
दीपज्योतिः देवो भवति ।। मम ।। २ ।।

रात्रौ अङ्के मां स्वापयति
मधु-मधु-मधुरं गीतं गायति।
मधुराः च कथाः मां श्रावयति
आऽऽ आऽऽ आऽऽ आऽऽ आ ।। मम ।। ३ ।।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३ - गौः



गौः पालितः पशुः अस्ति।
तस्याः चत्वारः पादाः सन्ति।
तस्याः द्वे शृङ्गे स्तः।
तस्याः पुच्छं दीर्घम् अस्ति।

गौः शुक्ला, श्यामा, रक्ता वा भवति।
कृषीवलाः गां पालयन्ति।
गौः दुग्धं ददाति।
सा धान्यं खादति।
सा हरितं घासं खादति।
सा शुष्कं घासं खादति।
सा रोमन्थं करोति।
सा रम्भते।





Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

४ - ईशा शुभां मिलति।

(उद्याने शुभा ईशा च मिलतः)

शुभा :- स्वस्ति । शुभसायम्।

ईशा :- शुभसायम् । किं तव नाम?

शुभा :- अहं शुभा । किं तव नाम?

ईशा :- अहम् ईशा। कुत्र अस्ति तव गृहम्?

शुभा :- अत्र एव । अस्य उद्यानस्य समीपे। कुत्र तव निवासः।

ईशा :- अग्रे गणेशमन्दिरम् अस्ति। तस्य पृष्ठतः।

शुभा :- अपि अत्र प्रतिदिनम् आगच्छसि? प्रथमम् एव पश्यामि।

ईशा :- नहि नहि, अवकाशदिवसे एव आगच्छामि। किम्? त्वं प्रतिदिनम् आगच्छसि?

शुभा :- आम्। अधुना सप्तवादनसमयः जातः।गृहं गच्छावः। श्वः षड्वादने पुनः मिलावः सायम्।

ईशा :- अत्र एव अशोकवृक्षस्य अधः। अस्तु। शुभमस्तु।

शुभा :- भवतु तर्हि। शुभमस्तु।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५ - पक्षि-गीतम्।

कोऽयं पक्षी? अयं मयूरः।
कुत्र निवासः? उपवन-वासः ॥१॥





हरितः कोऽयम्? शुक-नामायम्।
कूजति मधुरं, पञ्जर-वासः ॥२॥

कू-कूऽ कूऽऽ करोति कोऽयम्?
धीरगामी कुक्कुटोऽयम् ॥३॥





काव् काव् काव् करोति कोऽयम्
पश्यत काकम् अहो श्यामलम् ॥४॥

चिव् चिव् चटका निवसति नीडे।
तस्या लीला भवने विपिने ॥५॥



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६- चन्द्र-गीतम्।



हे चन्द्र, हे चन्द्र
श्रान्तोऽसि किम्।
निम्बूकस्य पश्चभागे
लुप्तोऽसि किम्।।

निम्बूकतरूस्तु कण्टकी।
मातुलालयस्तु इष्टकी।।
मातुलालयम् आगच्छ
घृतेन सह पोलीं खाद।
घृते मक्षिका पतिता रे
अशनेन विना चन्द्रः रे।।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

७ - कूर्म-शशकयोः कथा।

एकः अस्ति शशकः।
एकः अस्ति कूर्मः।
शशकः तुरं धावति।
कूर्मः मन्दं मन्दं चलति।





एकदा तौ उभौ धावतः।
कः अग्रे याति।
कः वृक्षं प्रति प्रथमं याति।
इति स्पर्धा भवति।

शशकः तुरं धावति।
अग्रे याति।
पृष्ठे पश्यति।
कूर्मः सुदूरं भवति।



शशकः हसति।
चिन्तयति च 'कदा एषः
आयाति। अहं स्वपिमि'
इति। स सवपिति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कूर्मः मन्दं मन्दं सततं चलति।
शशकं सुप्तं पश्यति।
अग्रे याति।
प्रथमं वृक्षं प्रति याति।





शशकः उत्तिष्ठति।
अत्र तत्र पश्यति।
कूर्मः न वर्तते।
तुरं धावति।

किन्तु कूर्मः तं वृक्षं प्राप्तः एव।
स कूर्मं पश्यति। खिन्नः भवति।
सततप्रयत्नेन मन्दः कूर्मः जयति।
आलस्येन तुरः शशकः पराभूतः भवति।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८ - मयूरः।



अयं मयूरः।
मयूरः पक्षी अस्ति।
मयूरः वने वसति।
मयूरस्य पिच्छानां कलापः मनोहरः।
मयूरस्य पिच्छे चित्राः चन्द्रकाः सन्ति।

शारदा विद्यायाः देवता।
मयूरः शारदायाः वाहनम्।
मेघानां दर्शनेन मयूरः सन्तुष्यति।
मेघानां गर्जनेन स आनन्दति।
मेघगर्जनेन मयूरः नृत्यति
नर्तनसमये मयूरस्य कलापः विस्तारितः भवति।
मयूरः भारतदेशस्य राष्ट्रीयः पक्षी अस्ति।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

९ - मम हस्तद्वयम्।

एषः स्नेहालुः तातः।
नाम अस्य **अङ्गुष्ठः** ॥१॥



निकटे निवसति ननु माता।
नाम **तर्जनी** तस्याः ॥२॥



ज्येष्ठा पुत्री दीर्घतमा।
तस्याः नाम **मध्यमा** ॥३॥

तस्याः भगिनी मनोरमा।
अस्ति ननु सा **अनामिका** ॥४॥



अन्ते भवति कनिष्ठबाला।
नाम तस्याः **कनिष्ठिका** ॥५॥



हस्तद्वयेन प्रणमामि।
आशीर्वादं विन्दामि ॥६॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१० - पत्रवितरकः।

राजीवः - कः अयम्?
माता - अयं पत्रवितरकः।
राजीवः - अयं किं करोति?
माता - अयं गृहं गृहं याति पत्राणि वितरति च।
राजीवः - तस्य दक्षिणे हस्ते किम् अस्ति?
माता - तस्य दक्षिणे हस्ते पत्राणि सन्ति।
राजीवः - तस्य वामे स्कन्धे किम् अस्ति?
माता - तस्य वामे स्कन्धे पत्रकोशः अस्ति।
राजीवः - पत्रकोशे किम् अस्ति?
माता - पत्रकोशे वितरणार्थं पत्राणि सन्ति।
राजीवः - पत्रवितरकः कुतः पत्राणि आनयति?
माता - पत्रवितरकः पत्रगृहात् पत्राणि आनयति।
राजीवः - पत्रगृहं पत्राणि कुतः आयान्ति?
जननी - अन्यग्रामेभ्यः अन्यनगरेभ्यः पत्राणि पत्रगृहम् आयान्ति। वयं पत्रपेटीमध्ये पत्राणि क्षिपामः। अन्यः पत्रवाहकः पेटीम् उद्घाटयति, पत्राणि गृह्णाति पत्रगृहं नयति च। पत्रगृहतः स्थानं स्थानं नीयन्ते पत्राणि।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

११ - गर्दभ-विडम्बना।



एकः गर्दभः अस्ति। तस्य पृष्ठे लवणस्य भारः अस्ति। स नदीं पारयति। तस्य पादः स्खलितः। स जले पतितः । स शीघ्रम् उत्थातुम् असमर्थः। केनचित् कालेन स उत्थितः। तस्य भारः लघुः जातः, यतः लवणं जले विलीनं जातम्। तस्य आनन्दः जातः।

अन्यस्मिन् समये किं जातम्? स्वामिना यथापूर्वं गर्दभस्य पृष्ठे भारः स्थापितः। स (गर्दभः) पूर्ववृत्तान्तं स्मृतवान्। जले पतित्वा भारः लघुः भवति इति। अतः गर्दभः हेतुतः जले पतितः। उत्थातुं प्रयत्नं करोति। किन्तु किं जातम्? भारः अधिकः भारवान् जातः। गर्दभस्य पृष्ठे कार्पासस्य भारः। जले क्लिन्नः स अधिकः भारवान् जातः। गर्दभः कथं कथमपि उत्तिष्ठति। किन्तु भारं वहन् स गर्दभः कष्टकुण्ठितः जातः। एवं गर्दभस्य विडम्बना बहु जाता।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१२ - गृहिणी-कार्याणि।

इयं सुमित्रा।
सुमित्रा किं करोति?
सुमित्रा बालकं संवर्धयति।

इयं अनघा।
अनघा किं करोति?
अनघा जलेन घटं पूरयति।

इयं नेत्रा।
नेत्रा किं करोति?
नेत्रा घटेन जलम् आनयति।

इयं दीपा।
दीपा किं करोति?
दीपा सम्मार्जन्या सम्मार्जनं करोति।

इयं नीला ।
नीला किं करोति?
नीला भूमिं मार्जयति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इयं राधा।
राधा किं करोति?
राधा दोहनं करोति।

इयं सुधा।
सुधा किं करोति?
सुधा वस्त्राणि क्षालयति।

इयं सीमा।
सीमा किं करोति?
सीमा वस्त्रं सीव्यति।

इयं रीमा।
रीमा किं करोति?
रीमा पेषण्यां धान्यं पिनष्टि।

इयं माया।
माया किं करोति?
माया मुसलेन धान्यानां कण्डनं करोति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इयं नीना।

नीना किं करोति?

नीना नारिकेलं चूर्णयति।

इयं मीना।

मीना किं करोति?

मीना पाकं पचति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१३ - स्त्री-व्यवसायाः।

इयं शीला।
शीला किं करोति?
शीला बालकान् पाठयति।
सा शिक्षिका अस्ति।

इयं छाया।
छाया किं करोति?
छाया टङ्कलेखनं करोति।
सा टङ्कलेखिका अस्ति।

इयं श्वेता।
श्वेता किं करोति?
श्वेता रुग्णांना शुश्रूषां करोति।
सा परिचारिका अस्ति।

इयं सङ्गीता।
सङ्गीता किं करोति?
सङ्गीता तन्तुवाद्यं वादयति।
सा वीणावादिका अस्ति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इयं ललिता।
ललिता किं करोति?
ललिता नृत्यं करोति।
सा नर्तकी अस्ति।



इयं रत्ना।
रत्ना किं करोति?
रत्ना शाकं विक्रीणीते।
सा शाकविक्रेत्री अस्ति।

इयं प्रिया।
प्रिया किं करोति?
प्रिया मत्स्यान् विक्रीणीते।
सा धीवरी अस्ति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१४ - पठत।


इयं **सरला** रेखा।
किन्तु इयं **वक्रा** रेखा।


इदं **गुरु**-वर्तुलम्।
किन्तु इदं **लघु**-वर्तुलम्।


इदं **स्वच्छं** वस्त्रम्।
किन्तु इदं **मलिनं** वस्त्रम्।

इदं पात्रं **जलपूर्णम्**।
किन्तु इदं पात्रं **रिक्तम्**।

प्रभाते सूर्यः उदयति।
सायङ्काले सूर्यः अस्तं याति।


अयं **स्थूलः** मनुष्यः।
किन्तु अयं **कृशः** मनुष्यः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१५ - कुत्र किम् अस्ति।



केशवस्य **दक्षिणतः** किम् अस्ति?

केशवस्य **दक्षिणतः** विद्यालयः अस्ति।

केशवस्य **वामतः** किम् अस्ति?

केशवस्य **वामतः** वसतिगृहम् अस्ति।

केशवस्य **पुरतः** किम् अस्ति?

केशवस्य **पुरतः** शकटः अस्ति।

केशवस्य **पृष्ठतः** किम् अस्ति?

केशवस्य **पृष्ठतः** मन्दिरम् अस्ति।

मन्दिरस्य **उपरि** किम् अस्ति?

मन्दिरस्य **उपरि** ध्वजः अस्ति।

शकटस्य **अधः** किम् अस्ति?

शकटस्य **अधः** कुक्कुरः अस्ति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१६ - रिक्तस्थलपूरणम्।

चित्राणां साहाय्येन रिक्तस्थलानि पूरयत।
(पूरणार्थं पदानि अधः चतुष्कोणे लिखितानि सन्ति।)

बालकः ______________ खादति।



बालिका ______________ जिघ्रति।



अम्बा ______________ धारयति।



सा ______________ पश्यति



वानरः ______________ आरोहति।



नारायणः ______________ पठति।

पूरणार्थं शब्दपदानि।

वृक्षम्, फलम्, शाटीम्, पेटीम्, पुस्तकम्, पुष्पम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१७ - नदी-तट -विहारः।



चित्रे एका नदी अस्ति।

चित्रे त्रयः पुरुषाः नदीतीरे उपविष्टाः सन्ति।

चत्वारः अन्ये पुरुषाः नदीजले तरन्ति।

चित्रे तिस्रः स्त्रियः नदीतीरे वार्तालापं कुर्वन्ति।

चतस्त्रः बालिकाः धावन्ति।

नदीतटे एकः वृक्षः अस्ति।

वृक्षे त्रयः काकाः सन्ति।

एकः वानरः शाखातः आलम्बते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१८ - सूर्यः।



सूर्यः प्रभाते पूर्वदिशि उदेति।
उदयकाले सूर्यबिम्बं रक्तं भवति।
सूर्यः गोलाकारः भवति।
पूर्वाह्णे सूर्यः शनैः शनैः आकाशम् आरोहति।
मध्याह्ने सूर्यः आकाशमध्यम् आयाति।
मध्याह्ने सूर्यस्य प्रकाशः प्रखरतमः अस्ति।
अपराह्णे सूर्यः आकाशे अवतरति।
सायङ्काले सूर्यः अस्तं याति।
अस्तमनकाले सूर्यबिम्बं रक्तं दृश्यते।
सूर्यः प्रकाशम् उष्णतां च ददाति।

सूर्योपासना -

ॐ मित्राय नमः।	ॐ रवये नमः।	ॐ सूर्याय नमः।
ॐ भानवे नमः।	ॐ खगाय नमः।	ॐ पूष्णे नमः।
ॐ हिरण्यगर्भाय नमः।	ॐ मरीचये नमः।	ॐ आदित्याय नमः।
ॐ सवित्रे नमः।	ॐ अर्काय नमः।	ॐ भास्कराय नमः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१९ - मम शरीरम्।

इदं मम शरीरम्।
मम द्वौ हस्तौ।
अयं मम दक्षिणः हस्तः।
अयं मम वामः हस्तः।
अहं हस्ताभ्यां कार्यं करोमि।
अहं हस्ताभ्यां देवं नमामि।

मम द्वौ चरणौ।
अयं मम दक्षिणः चरणः।
अयं मम वामः चरणः।
अहं चरणाभ्यां चलामि।
अहं चरणाभ्यां धावामि।

मम द्वौ कर्णौ।
अयं मम दक्षिणः कर्णः।
अयं मम वामः कर्णः।
अहं कर्णाभ्याम् आकर्णयामि।

मम द्वे नेत्रे।
इदं मम दक्षिणं नेत्रम्।
इदं मम वामं नेत्रम्।
अहं नेत्राभ्यां पश्यामि।

इयं मम नासिका।
अहं नासिकया गन्धं जिघ्रामि।
अहं नासिकया श्वासोच्छ्वासं करोमि।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२० - कः, केन, किं करोति।

बालः कन्दुकेन क्रीडति।

मनुष्यः छत्रेण पर्जन्यधाराभ्यः आत्मानं निवारयति।

छात्रः लेखन्या पाठं लिखति।



मालाकारः जलेन वृक्षान् सिञ्चति।

काष्ठिकः कुठारेण काष्ठं खण्डयति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कृषकः खनित्रेण भूमिं खनति।



धीवरः जालेन मत्स्यान् समाहरति।

व्याधः बाणेन मृगं मारयति।

सैनिकः गोलिकाभिः शत्रून् मारयति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२१ - कुत्र अस्ति।



कुक्कुरः कुत्र अस्ति?

कुक्कुरः लेखनपीठस्य अधः अस्ति।

दुग्धं कुत्र अस्ति?

दुग्धं कुपिकासु अस्ति।



शुकः कुत्र अस्ति?

शुकः पञ्जरे अस्ति।



पत्रवितरकः कुत्र तिष्ठति?

पत्रवितरकः द्वारे तिष्ठति।

बालकः कुत्र अस्ति?

बालकः तस्य अम्बायाः समीपे अस्ति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२२ - विद्यालये वर्गः।



आचार्यः - बालाः उत्तिष्ठत। (बालाः उत्तिष्ठन्ति।)
आचार्यः - सुप्रभातम्।
शिष्याः - सुप्रभातम्। प्रणमामः।
आचार्यः - बालाः उपविशत। (बालाः उपविशन्ति।)
रमेशः - आचार्य, वर्गं प्रविशानि किम्।
आचार्यः - रमेश, अद्य अपि कथं चिरेण आगतः।
रमेशः - आचार्य, क्षम्यताम् । प्रमादः जातः।
श्वः समये आगमिष्यामि।
आचार्यः - रमेश, प्रविश तर्हि। (रमेशः प्रविशति।)
आचार्यः - प्रार्थनां गायामः वयम्।
(आचार्यः छात्राः च प्रार्थनां गायन्ति।)
आचार्यः - उपविशत। (छात्राः उपविशन्ति।)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२३ - अस्तित्व-दर्शनम्।

भ्रमरः कमले अस्ति।
कमलं जले अस्ति।
जलं सरोवरे अस्ति।
सरोवरः अरण्ये अस्ति।
अरण्यं ग्रामसमीपे अस्ति।





नाविकः नौकायाम् अस्ति।
नौका जले अस्ति।
जलं नदीपात्रे अस्ति।
नदी ग्रामे अस्ति।

ग्रामः मण्डले अस्ति।
मण्डलं राज्ये अस्ति।
राज्यं भारते अस्ति।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२४ - मासाः।

चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्विनः,कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनः च इति वर्षस्य द्वादश मासाः।

कः प्रथमः	मासः?	चैत्रः प्रथमः मासः।
कः द्वितीयः	मासः?	वैशाखः द्वितीयः मासः।
कः तृतीयः	मासः?	ज्येष्ठः तृतीयः मासः।
कः चतुर्थः	मासः?	आषाढः चतुर्थः मासः।
कः पञ्चमः	मासः?	श्रावणः पञ्चमः मासः।
कः षष्ठ :	मासः?	भाद्रपदः षष्ठ : मासः।
कः सप्तमः	मासः?	आश्विनः सप्तमः मासः।
कः अष्टमः	मासः?	कार्तिकः अष्टमः मासः।
कः नवमः	मासः?	मार्गशीर्षः नवमः मासः।
कः दशमः	मासः?	पौषः दशमः मासः।
कः एकादशः	मासः?	माघः एकादशः मासः।
कः द्वादशः	मासः?	फाल्गुनः द्वादशः मासः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२५ - बालाः स्वप्रमादं जानन्ति।

आसीत् एकः तडागः।
तत्र आसन् मण्डूकाः।
पार्श्वे आसीत् क्रीडाङ्गणम्।
तत्र बालाः अक्रीडन्।
क्रीडार्थं बालाः तडागे
पाषाणखण्डान् क्षिपन्ति स्म।
जललवाः उदपतन्।
बालानाम् आनन्दः जातः.

परन्तु पाषाणखण्डान् अघातयन् मण्डूकान्।

एवं प्रतिदिनं चलति स्म।
सर्वे मण्डूकाः भयाकुलाः।
ततः एकः मण्डूकः अग्रे आगच्छत्।
स बालान् अपृच्छत्-

"बालाः यूयं किमर्थं पाषाणान् क्षिपथ?" इति।
बालाः अवदन्-इयम् अस्माकं क्रीडा इति।

मण्डूकः अवदत्-
'युष्माकं क्रीडा भवति, परन्तु
अस्माकं प्राणाः गच्छन्ति' इति।
बालाः खिन्नाः जाताः। वयं प्रमत्ताः इति तैः ज्ञातम्।
तत्पश्चात् बालाः पाषाणखण्डान् न अक्षिपन्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२६ - आरोहति-अवतरति।

मर्कटः वृक्षम् आरोहति।





वानरः वृक्षात् अवतरति।

सैनिकः अश्वम् आरोहति।



सैनिकः अश्वात् अवतरति।

गोपालः सोपानमार्गेण आरोहति।



रमेशः सोपानमार्गेण अवतरति।

मोहनः पर्वतम् आरोहति।

श्रीधरः पर्वतात् अवतरति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२७ - पश्यामि-पश्यसि-पश्यति।



आकाशे चन्द्रः अस्ति। अहम् आकाशे चन्द्रं पश्यामि।
त्वम् आकाशे चन्द्रं पश्यसि। रामः आकाशे चन्द्रं पश्यति।

तडागे जलम् अस्ति। अहं तडागे जलं पश्यामि।
त्वं तडागे जलं पश्यसि। सीता तडागे जलं पश्यति।

जले कमलम् अस्ति। अहं जले कमलं पश्यामि।
त्वं जले कमलं पश्यसि। रेखा जले कमलं पश्यति।

वृक्षे फलानि सन्ति। अहं वृक्षे फलानि पश्यामि।
त्वं वृक्षे फलानि पश्यसि। राधा वृक्षे फलानि पश्यति।

पञ्जरे शुकः अस्ति। अहं पञ्जरे शुकं पश्यामि।
त्वं पञ्जरे शुकं पश्यसि। मीना पञ्जरे शुकं पश्यति।

नीडे पक्षी अस्ति। अहं नीडे पक्षिणं पश्यामि।
त्वं नीडे पक्षिणं पश्यसि। ईशा नीडे पक्षिणं पश्यति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२८ - आम्रफलं कुत्र अस्ति।

आम्रफलम् उत्पीठस्य **उपरि** अस्ति।





आम्रफलम् उत्पीठस्य **अधः** अस्ति।

आम्रफलं पेटिकायाः **पुरतः** अस्ति।





आम्रफलं पेटिकायाः **पृष्ठतः** अस्ति।

आम्रफलं पेटिकायाः **अन्तः** अस्ति।





आम्रफलं पेटिकायाः **बहिः** अस्ति।

आम्रफलम् उत्पीठस्य **कोणे** अस्ति।





आम्रफलं पेटिकायाः **समीपे** अस्ति।

आम्रफलं पेटिकातः **दूरे** अस्ति।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२९ - धूर्तः शृगालः।

एकः काकः मांसखण्डं पश्यति।
मांसखण्डं गृहीत्वा स वृक्षस्य
शाखां गच्छति । तत्र स्वस्थः
आनन्देन मांसखण्डं खादति।



तत्र एकः शृगालः आयाति।
स काकमुखे मांसखण्डं पश्यति।
शृगालः चिन्तयति "तं मांसखण्डम्
अहं कथं लभेयम्"? इति।

स काकं स्तोतुम् आरभते।
त्वं सुन्दरः पक्षी। तव वर्णः आकर्षकः।
तव स्वरः मधुरः। त्वं मधुरं गायसि।
कृपां कुरु। तव गानं श्रोतुम् इच्छामि"। इति।
स्तुतिः कस्य न प्रिया?

काकः गातुं मुखव्यादानं करोति।
मांसखण्डं मुखात् अधः पतति।
शृगालः मांसखण्डं गृहीत्वा वदति-
"काक, मधुरं गानं कुरु" इति।
शृगालः पलायते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३० - सिंह-मूषकयोः कथा।

एकस्मिन् अरण्ये वसति एकः सिंहः।
पर्वतस्य गुहायां स दिवा निद्राति।
रात्रौ इतस्ततः परिभ्रमन् पशून् खादति।
एकदा विपुलम् आहारं कृत्वा
स वृक्षस्य छायायां निद्राति।
पुष्कलाः मूषकाः बिलात् निर्गत्य
सिंहस्य शरीरे नृत्यन्ति।
सिंहः जागरितः भवति।
सर्वे मूषकाः भीत्वा पलायन्ते।
एकं मूषकं सिंहः धरति।
स मूषकः भीतः अस्ति।
भीतः मूषकः सिंहं वदति।
"त्वं पशूनां राजा। तव पराक्रमः प्रसिध्दः।
अहं क्षुद्रप्राणी। मम अपराधं क्षमस्व।
मयि दयां कुरु। मां मा मारय।
मां मुक्तं कुरु। अहं गृहं गच्छामि।
अहं तव साहाय्यं करिष्यामि।" इति।

एकदा सिंहः जाले बद्धः जातः।
स उच्चैः गर्जति।
सिंहगर्जनां श्रुत्वा स मूषकः
स्वबान्धवैः सह तत्र आगच्छति।
मूषकः वदति-महाराज, न भेतव्यम्।
वयं स्वदन्तैः जालं त्रोटयामः इति।
मूषकाः जालं तीक्ष्णदन्तैः त्रोटयन्ति।
सिंहः मुक्तः भवति। स सुदूरं गच्छति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३१ - घटिका।



टिक् टिक् टिक्
हे घटिके, किं भूतम्?
रुष्टासि अयि त्वं किमर्थम्?
कर्कशवचनम् उक्तं किम्?
केनापि काष्ठेन ताडितं किम्?
नहि नहि वदसि, रोदिषि किम्?
टिक् टिक् टिक् घटिके, त्वं मूकासि किम्?॥१॥
टिक् टिक् टिक् तव नादः कुत्र ननु गतः?
कुत्र विलीनो भूतः नैव, ज्ञायते
हस्तौ ते अधुना अचलौ किम्?
टिक् टिक् टिक् घटिके, त्वं शान्तासि किम्?॥२॥
चिरात् खलु तव उदरं रिक्तं किम्?
शीघ्रमुदरभरणं ते करवाणि किम्?
कुञ्जिकावर्तनेन तृप्तासि किम्?
वद वद वद हे घटिके, सुप्तासि किम्?॥३॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संस्कृत-सुभाषित-माला ॥२॥

(केवलं कण्ठस्थीकरणार्थम्।)

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥१॥
उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखं मृगाः ॥२॥
पिण्डे पिण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः।
जातौ जातौ नवाचारा नवा वाणी मुखे मुखे ॥३॥
वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम् ।
वृथा दानं समर्थस्य वृथा दीपो दिवापि च ॥४॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मृत्युलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥५॥

न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥६॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पाठाधारेण केचित् संस्कृतप्रश्नाः।

द्वितीयो भागः।

पाठ : ७

१) शशकः कथं धावति?	(तुरं)
२) कः तुरं धावति?	(शशकः)
३) कूर्मः कथं धावति?	(मन्दं मन्दं)
४) कः मन्दं मन्दं धावति?	(शशकः)
५) प्रथमं कः अग्रे याति?	(शशकः)
६) शशकः मार्गे किं करोति?	(स्वपिति।)
७) कः प्रथमं वृक्षं प्रति याति?	(कूर्मः)
८) कः स्पर्धां जयति?	(कूर्मः)
९) कः पराभूतः भवति?	(शशकः)

पाठ : ८

१) मयूरः कुत्र वसति?	(वने)
२) चन्द्रकाः कुत्र सन्ति?	(मयूरस्य पिच्छे)
३) का विद्यायाः देवता?	(शारदा)
४) शारदायाः वाहनं किम्?	(मयूरः)
५) मयूरः केन सन्तुष्यति?	(मेघानां गर्जनेन)
६) मयूरस्य कलापः कदा विस्तारितः भवति?	(नर्तनसमये)

पाठ : १७

१) चित्रे कति पुरुषाः नदीतीरे उपविष्टाः सन्ति?	(त्रयः)
२) कति बालिकाः धावन्ति।	(चतस्रः)
३) वृक्षे कति काकाः सन्ति?	(त्रयः)

पाठ : १८

१) सूर्यः कुत्र उदेति?	(पूर्वदिशि)
२) सूर्यः कदा उदेति?	(प्रभाते)
३) पूर्वाह्णे सूर्यः किं करोति?	(आकाशम् आरोहति।)
४) मध्याह्ने सूर्यः कुत्र आयाति?	(आकाशमध्यम्)
५) मध्याह्ने सूर्यस्य प्रकाशः कीदृशः अस्ति?	(प्रखरतमः)
६) सूर्यः कदा अस्तं याति?	(सायङ्काले)
७) सूर्यः किं किं ददाति?	(प्रकाशम् उष्णतां च)

पाठ : १९

१) मनुष्यः हस्ताभ्यां किं. करोति?	(कार्यं करोति। देवं नमति।)
२) मनुष्यः चरणाभ्यां किं करोति?	(चलति धावति च।)
३) मनुष्यः नेत्राभ्यां किं. करोति?	(पश्यति।)
४) मनुष्यः नासिकया किं करोति?	(श्वासोच्छ्वासं)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

परिशिष्टानि।

१- संस्कृत-शब्द-बोधः।

विरुद्धार्थक-विशेषण - शब्दाः		विरुद्धार्थक-अव्यय-शब्दः
भद्र X अभद्र	उच्च X नीच	अग्रे X पृष्ठे
मङ्गल X अमङ्गल	उत्तम X अधम	अग्रतः X पृष्ठतः
शान्त X अशान्त	कृश X पीवर	अत्र X तत्र
शुद्ध X अशुद्ध	गुरु X लघु	अन्तर् X बहिः
शुभ X अशुभ	पूर्ण X रिक्त	उपरि X अधः
सभ्य X असभ्य	प्राचीन X अर्वाचीन	न X आम्
साध्य X असाध्य	वन्य X ग्रामीण	निकटे X दूरे
सामान्य X असामान्य	शीत X उष्ण	प्रातः X सायम्
स्पष्ट X अस्पष्ट	सम X विषम	रात्रौ X दिवा
स्वच्छ X अस्वच्छ	सरल X वक्र	शनैः X द्रुतम्

२ - अक्षरमाला। (केवलं दिग्दर्शनार्थम्।)

क	का	कि	की	कु	कू	कृ	के	कै	को	कौ
त	ता	ति	ती	तु	तू	तृ	ते	तै	तो	तौ
प	पा	पि	पी	पु	पू	पृ	पे	पै	पो	पौ
म	मा	मि	मी	मु	मू	मृ	मे	मै	मो	मौ
व	वा	वि	वी	वु	वू	वृ	वे	वै	वो	वौ
श	शा	शि	शी	शु	शू	शृ	शे	शै	शो	शौ
स	सा	सि	सी	सु	सू	सृ	से	सै	सो	सौ

ऋ -स्वरादि-शब्दाः। ऋजु, ऋजुता, ऋण, ऋषि।

ऋ -स्वरान्त-अक्षर-युक्त-शब्दाः। आकृति, कृति, कृत्य, कृमि, कृषक, कृषि, कृष्ण, जृम्भा, प्रकृति, प्रतिकृति, विकृति, तृप्ति, दृश्य, दृष्टि, धृतराष्ट्र, नृत्य, नृप, नृपति, नृसिंह, पृथिवी, पृथ्वी, पृष्ठ, भृङ्ग, भृत्य, मृग, मृत्यु, वृक्ष, वृत्त, वृत्तपत्र, वृत्ति, वृद्ध, वृष्टि, शृङ्ग, शृङ्गार, सदृश, सादृश्य, सृष्टि, हृष्ट।

लृ-स्वरान्त-अक्षर-युक्त-शब्दः। क्लृप्ति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

३ - संस्कृत-अव्यय-शब्दाः। (सार्थाः।)

अपि	Also	दक्षिणतः	To the right
अयि	Oh!	दिवा	By day
अरे	Oh!	दूरम्	At a distance
अग्रे	Ahead	द्रुतम्	Swiftly
अत्र	Here	न	No, Not
अथवा	Or	नहि	No, Not
अद्य	Today	ननु	Indeed
अधुना	Now	नमः	A bow to
अधः	Below	पुरतः	In front
अवश्यम्	Surely	पृष्ठतः	To the back
इतस्ततः	Here and there	प्रति	Towards
एव	Exactly	प्रातः	In the morning
कथम्	How	बहु	Much
कदा	When	यथा	As
किम्	What	यथापूर्वम्	As before
किंवा	Or	यथेच्छम्	At will
किन्तु	But	रे	Oh!
कुतः	Whence	वा	Or
कुत्र	Where	वामतः	To the left
क्व	Where	वृथा	In vain
च	And	शीघ्रम्	Quickly
चिरम्	For Long	सत्वरम्	Quickly
चिरात्	For Long	सायम्	In the evening
तत्र	There	हि	Really
तर्हि	Then	हेतुतः	Intentionally
तुरम्	Swiftly	शूर्पवत्	Like शूर्प
		स्तम्भवत्	Like स्तम्भ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तःअन्त-अव्यय-शब्दाः।
(Ending in तः।)

देवालयतः	From देवालय
गोपालगृहतः	From house of Gopal
विपणितः	From market
स्वगृहतः	From one's own house

तुम्-अन्त-अव्यय-शब्दाः।
(Ending in तुम्)

खेलितुम्	For playing
उत्थातुम्	For getting up
श्रोतुम्	For hearing
स्तोतुम्	For praising

त्वा-अन्त-अव्यय-शब्दाः।
(Ending in त्वा.)

कृत्वा	Having done
गृहीत्वा	Having taken
पतित्वा	Having fallen
भीत्वा	Being afraid

ल्यबन्त-अव्यय-शब्दाः.

आनीय	Having brought
उड्डीय	Having flown
निर्गत्य	Having gone
परिधाय	Having dressed

किमर्थम्	For what

४ - संस्कृत-विशेषण-शब्दाः। (सार्थाः।)

धातुतः	विशेषण-शब्दाः।
आगत	Has come
उक्त	Spoken
उत्थित	Got up
उपविष्ट	Seated
क्लिन्न	Wet
खिन्न	Sad
चित्रित	Variegated
जागरित	Awakened
जात	Born, become
ताडित	Beaten
तृषित	Thirsty
दत्त	Given
पतित	Fallen
पराभूत	Defeated
पालित	Protected
प्राप्त	Reached
बद्ध	Caught
भीत	Frightened
भूत	has become
रिक्त	Empty
लुप्त	Hidden
विलीन	Melted
विस्तारित	Expanded

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वृत्त	Happened
शान्त	Calm
शुद्ध	Purified
शुष्क	Dry
श्रान्त	Tired
सन्तुष्ट	Pleased
सुप्त	Slept
स्खलित	Stumbled
स्थापित	Placed
स्थित	stopped

मूलतः विशेषण-शब्दाः।

अचल	Not moving
अधिक	More
एकल	Alone
कनिष्ठ	Youngest
कुशल	Skilled
कृश	Lean
गुरु	Big
चित्र	Variegated
ज्येष्ठ	Eldest
तुर	Speedy
दक्षिण	Right
दीर्घ	Long
नवीन, नव	New
पुष्कल	Many
प्रखर	Hot

प्रखरतर	More hot
बहु	Much, many
मन्द	Slow
मलिन	Dirty
मृदु	soft
मृदुल	soft
रक्त	Red
रिक्त	Empty
लघु	Small
वक्र	Curved
वाम	Left
विशाल	Big
शुक्ल	White
स्थूल	Big, fat
श्याम	Black
श्यामल	Black
सरल	Straight
स्वच्छ	Clean
अतिसरल	Most straight
अतुल	Uncomparable
अनशन्	Without eating
असमर्थ	Unable
इष्टकाबद्ध	Built of brick
कण्टकान्वित	Thorny
कृतज्ञ	Grateful
गृहकुशल	Skilled in household work
गोलाकार	Round

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

घृतयुक्त	with ghee	मनोहर	Pleasing
जलपूर्ण	Full of water	विघ्नहर्तृ	Expeller of calamity
दुःखहर्तृ	Remover of sorrow	सुखकर्तृ	Doer of happiness

५ - क्रियापद-कोशः। (सार्थः।)

अपाकरोति	Removes	गच्छति	Goes
अपावृणोति	Uncovers	गायति	Sings
अवतरति	Comes down	गृह्णाति	Catches
अवसीदति	Perishes	चलति	Moves
अस्ति	Is	चिन्तयति	Thinks
आगच्छति	Comes	जिघ्रति	Smells
आनयति	Brings	तिष्ठति	stands
आयाति	Comes	तोषयति	Pleases
आरोहति	Climbs	ददाति	Gives
आरौति	Cries	धारयति	Wears
उदेति	Rises	धावति	Runs
उपविशति	Sits	नमति	Bows
करोति	Does	नयति	Takes away
कर्षति	Drags	निद्राति	Sleeps
कूजति	Sings	निवारयति	Protects
क्रीडति	Plays	नीराजयति	Waves the light
क्रोशति	Cries	नृत्यति	Dances
क्षिपति	Throws	पठति	Reads
खण्डयति	Breaks	पश्यति	Sees
खनति	Digs	पाययति	Gives to drink
खादति	Eats	पाठयति	Teaches

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पिबति	Drinks
प्रसारयति	Spreads
भवति	Becomes
भाति	Shines
भोजयति	Feeds
भ्रमति	Roams
मारयति	Kills
मिलति	Meets
मोहयति	Stupefies
वसति	Stays
याति	Goes
रञ्जयति	Amuses
वदति	Speaks
वसति	Stays
वहति	Carries
लिखति	Writes
सन्तुष्यति	Satisfies
समाहरति	Collects
सिञ्चति	Sprikles
लालयति	Fondles
श्रावयति	Makes hear
स्वापयति	Makes asleep
उड्डयते	Flies
डयते	Flies
प्लवते	Floats

आयान्ति	They come
उपविशन्ति	They sit
चरन्ति	They move
त्रोटयन्ति	They pluck
नृत्यन्ति	They dance
प्रविशन्ति	They enter
यान्ति	They go
वर्तन्ते	They are
सिध्यन्ति	They accomplish

वर्तमानकाले।

(अहम् / अहं =I)

अस्मि	I am
आकर्णयामि	I hear
आयामि	I come
चलामि	I walk
करोमि	I do
क्षिपामि	I throw
गच्छामि	I go
जिघ्रामि	I smell
धरामि	I take
धावामि	I run
ध्यायामि	I meditate
नमामि	I bow
पश्यामि	I see
पिबामि	I drink
पूजयामि	I worship
प्रणमामि	I bow
भक्षयामि	I eat
वदामि	I speak
वसामि	I stay
वन्दे	I bow

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

असि	You are
आयासि	You come
करोषि	you do
पश्यसि	you see
रोदिषि	You cry
वससि	you stay
त्रोटयामः	we cut

आज्ञार्थे।

(त्वम्	= You)
एहि	Come
गमय	Lead
जीव	Live
प्रदेहि	Give
प्रविश	Enter
प्राप्नुहि	Get
वद	Speak
वर्धस्व	Grow
विधेहि	Keep
(यूयम्)	[You (all)]
आयात	Come
उत्तिष्ठत	Stand
उपविशत	Sit down
कुरुत	Do
धरत	Catch
प्रविशत	Enter
यात	go
स्पृशत	Touch

हसत	Laugh
अहं प्रविशानि	May I enter?
पश्यन्तु	May they see
भवन्तु	May they be
अस्तु	May it be
लसतु	May it shine
क्षम्यताम्	May be excused
ज्ञायते	Is known
त्वं भवेः	You may be
भवेत्	May it be

६ - नाम-पद-अर्थ-कोशः।

असतः	From असत्
तमसः	From तमस्
मुखात्	From मुख
मृत्योः	From मृत्यु
अशनम्	Food
यूथः	Flock
व्यादानम्	Opening of mouth

बाला यान्ति	=	बालाः यान्ति
मृगाश्चरन्ति	=	मृगाः चरन्ति
मतिर्भिन्ना	=	मतिः भिन्ना
वर्धत एव	=	वर्धते एव
तृप्तासि	=	तृप्ता असि
रुष्टासि	=	रुष्टा असि
शान्तासि	=	शान्ता असि
सुप्तासि	=	सुप्ता असि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

७ - संस्कृत-सर्वनाम-पदानि। (सार्थानि।)

अयम्/अयं	This (m)	ताः	They, Those (f)
इयम्/इयं	This (f)	तानि	They, Those (n)
इदम्/इदं	This (n)	एषः	This (m)
अहम्/अहं	I	एषा	This (f)
वयम्/वयं	We	एतत्	This (n)
त्वम्/त्वं	you	मम	My
यूयम्/यूयं	You	तव	Your
सः=स	He	तस्य	His, its
सा	She	तस्याः	Her
तत्	That	कस्य	Whose (m)
कः	Who, What (m)	कस्याः	Whose (f)
का	Who, what (f)	माम्/मा	To me
किम्	What (n)	त्वाम्/त्वा	To you
ते	They, Those (m)		

८ - संस्कृत-नाम-पद-अर्थ-बोधः।

यथा - चित्रे = in चित्र, वृक्षे = on वृक्ष, तथा एव -
आकाशे, उत्पीठे, कमले, कुण्डे, कोणे, गोष्ठे, जले, ग्रामे, घृते, तडागे, दर्पणे, द्वारे, नीडे, पञ्जरे, पिच्छे, पिण्डे, पुच्छे, पृष्ठे, स्कन्धे, कुण्डे कुण्डे, मुखे मुखे, पिण्डे पिण्डे, जातौ जातौ। कणत्यागे, क्षणत्यागे, अस्तमनकाले, अवकाशदिवसे, अपराह्णे, उदयकाले, नदीजले, नदीतटे , नर्तनसमये, पत्रकोशे, पत्रपेटीमध्ये, पूर्वाह्णे, मध्याह्ने, सायङ्काले, मृत्युलोके, वसन्तसमये प्राप्ते, गुहायाम्, नद्याम्, नौकायाम्, पेट्याम्, शालायाम्
सेतौ, जातौ,

(यथा-गर्जनेन) = by गर्जन। तथा - मेघगर्जनेन, दर्शनेन, हस्तद्वयेन, सोपानेन, मुखेन, पृष्ठेन, कुञ्चिकावर्तनेन, कलहेन, काव्य-शास्त्र-विनोदेन, उद्यमेन, काष्ठेन, शुण्डया, नासिकया, निद्रया, चञ्च्वां,
यथा **शकटस्य = of शकट**, तथा-गणेशस्य, अश्वस्य, तृप्तस्य, समर्थस्य, सिंहस्य, सुप्तस्य।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सूचना - कृपया मुद्रण-दोष-परिहारार्थम् अधोदर्शित-परिवर्तनं कृत्वा एव पुस्तक-वाचन-प्रारम्भः भवतु।

पृष्ठम्	पङ्क्तिः	सदोष-मुद्रणम्	निर्दोष-लेखनम्
संस्था-बोध-चिह्न-पृष्ठम्		रुप्यकाणि	**रूप्यकाणि**
प्रार्थना ॥१॥	१०	तमसों	**तमसो**
२	३	ऋ	**ॠ**
१६		पाटलः	**धूमलः**
६८	७	कुठोरण	**कुठारेण**
७०	४	कुपिकासु	**कूपिकासु**
७१	१०	गायामः	**गायाम**
७४	९	पाषाणखण्डान्	**पाषाणखण्डाः**
७८	८	लभेयम्	**लभेय**
८१	१२	मनुष्यरुपेण	**मनुष्यरूपेण**
८२	प्रश्नः ४	(शशकः)	**(कूर्मः)**

निवेदनम्

संस्कृतभाषायाः सूक्ष्माभ्यासार्थं संस्कृतभाषाप्रावीण्य-सम्पादनार्थं च श्री. ग. वा. करन्दीकर-लिखितानि चत्वारि पुस्तकानि अतीव उपयोगीनि सन्ति। आयडियल-बुक-कम्पनी-मध्ये अन्य पुस्तकालयेषु च उपलभ्यन्ते।

१) संस्कृतभाषापरिचयः। सप्तमावृत्तिः। मूल्यं ३२ रू.

२) संस्कृतभाषा गृहे गृहे। चतुर्थावृत्तिः। मूल्य ३२ रू.
(एते द्वे पुस्तके - केवलं ७२ होरासु संस्कृतभाषाध्ययनवर्गार्थम्।)

३) संस्कृतवाग्विलासः ॥१॥ प्रथमावृत्तिः। मूल्यं २५ रू.
(माध्यमिक-विद्यालय-विद्यार्थि-जन-कृते अतीवोपयोगि पुस्तकम्।)

४) हसत् खेलत् संस्कृतम्। प्रथमावृत्तिः। मूल्यं २५ रू.
रचनाकाराः। सौ.पूजा साठे २) सौ. सन्ध्या मिरवणकर ३) सौ. शोभना करन्दीकर
(बालांना कृते एकमासावधिक-संस्कृत-वर्ग-चालनार्थम् उपयोगि पुस्तकम्।)

पत्रव्यवहारार्थम् - श्री. ग. वा. करन्दीकर, एफ् ४८, मयूर सोसायटी,
कीर्ति-महाविद्यालय-मार्ग, दादर, मुम्बई - ४०० ०२८।
दूरभाषः ४२२ ९२ १४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi